योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ११२

< योगवासिष्ठः | प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)

द्वादशाधिकशततमः सर्गः ११२

श्रीवसिष्ठ उवाच ।

इति प्राप्य परं योगमुपदेशमनुत्तमम् ।

जीवन्मुक्तो बभूवासौ ततो देवगुरोः सुतः ।। १

निर्ममो निरहंकारश्छिन्नग्रन्थिः प्रशान्तधीः ।

कचो यथा स्थितो राम तथा तिष्ठाविकारवान् ।। २

अहंकारमसद्विद्धि मैनमाश्रय मा त्यज ।

असतः शशशृङ्गस्य किल त्यागग्रहौ कुतः ।। ३

असंभवत्यहंकारे क्व ते मरणजन्मनी ।

नभःक्षेत्रे तथा व्युप्तं केन संगृह्यते फलम् ।। ४

निरंशं शान्तसंकल्पं सर्वभावात्मकं ततम् ।

परमादप्यणोः सूक्ष्मं चिन्मात्रं त्वमनोमयम् ।। ५

यथाम्भसस्तरङ्गादि यथा हेम्नोऽङ्गदादि च ।

तदेवातदिवाभासं तथाहंभावभावितः ।। ६

अबोधेन जगत्सर्वं मायामयमिव स्थितम् ।

बोधेन सकलं ब्रह्मरूपं संपद्यतेऽनघ ।। ७

द्वित्वैकत्वमती त्यक्त्वा शेषस्थः सुखितो भव ।

मा दुःखितो भव व्यर्थं त्वं मिथ्यापुरुषो यथा ।। ८

मायेयमतिदुष्पारा सांसारी गाढतां गता ।

शरदा मिहिकेवाशु बोधेनायाति तानवम् ।। ९

श्रीराम उवाच ।

परमामागतोऽस्म्यन्तस्तृप्तिं ज्ञानामृतेन ते ।

अवग्रहभयाक्रान्तः स्वासारेणेव चातकः ।। १०

अमृतेनेव सिक्तोऽहमन्तर्गच्छामि शीतताम् ।

उपर्यपि समस्तानां तिष्ठाम्यतुलसंपदाम् ।। ११

न तृप्तिमनुगच्छामि वचांसि वदतस्तव ।

ऐन्दवीनां मरीचीनां चकोरस्तृषितो यथा ।। १२

तृप्तोऽपि भूयः पृच्छामि त्वां प्रश्नमिममीश्वर ।

को नाम तृप्तोऽप्यग्रस्तं न पिबत्यमृतासवम् ।। १३

किमुच्यते मुनिश्रेष्ठ मिथ्यापुरुषनामकम् ।

वस्त्ववस्तु कृतं जगद्वस्तुजातं वदाशु मे ।। १४

श्रीवसिष्ठ उवाच ।

मिथ्यापुरुषबोधाय श्रृणु राघव शोभनाम् ।

इमामाख्यायिकां हासजननीं मदुदीरिताम् ।। १५

अस्ति कश्चिन्महाबाहो मायायन्त्रमयः पुमान् ।

बालपेलवधीमूढो गूढो मौर्ख्येण केवलम् ।। १६

स एकान्ते क्वचिज्जातः शून्ये तत्रैव तिष्ठति ।

केशोण्ड्रकमिव व्योम्नि मृगतृष्णेव वा मरौ ।। १७

तस्मादन्यन्न तत्रास्ति यदस्ति च स एव तत् ।

यच्चान्यत्तत्तदाभासं न च पश्यति दुर्मतिः ।। १८

संकल्पस्तस्य संजातस्तत्र वृद्धिमुपेयुषः ।

खस्याहं खमहं खं मे खं रक्षामीति निश्चलः ।। १९

खं स्थापयित्वा रक्षामि वस्त्विष्टं स्वयमादरात् ।

इति संचिन्तयन्व्योमरक्षार्थं सोऽकरोद्गृहम् ।। २०

तस्य कोशे बबन्धास्थां रक्षितं खं मयेत्यसौ ।

गृहाकाशेन संतुष्टस्ततः स रघुनन्दन ।। २१

अथ कालेन तत्तस्य गृहं नाशमुपाययौ ।

ऋत्वन्तरेणाब्द इव वातेनेव तरङ्गकः ।। २२

हा गृहाकाश नष्टं त्वं हा क्व यातमसि क्षणात् ।

हा हा भग्नमसि स्वच्छमित्येवैतच्छुशोच सः ।। २३

इति शोकशतं कृत्वा पुनस्तत्रैव दुर्मतिः ।

कूपं चक्रे खरक्षार्थं कूपाकाशपरोऽभवत् ।। २४

ततो नाशं स कालेन नीतः कूपोऽपि तस्य वै ।

कूपाकाशे गते शोकनिमग्नोऽसौ ततोऽभवत् ।। २५

कूपाकाशप्रलापान्ते कुम्भं शीघ्रमथाकरोत् ।

कुम्भाकाशपरो भूत्वा स्वयं निर्वृतिमाययौ ।। २६

कुम्भोऽपि तस्य कालेन नाशं नीतो रघूद्वह ।

यामेव दिशमादत्ते दुर्भगः सा हि नश्यति ।। २७

कुम्भाकाशप्रलापान्ते खरक्षार्थं चकार सः ।

कुण्डं तथैव तेनासौ कुण्डाकाशपरोऽभवत् ।। २८

कुण्डमप्यस्य कालेन केनचिन्नाशमाययौ ।

तेजसेव तमस्तेन कुण्डाकाशं शुशोच सः ।। २९

कुण्डाकाशस्य शोकान्ते खरक्षार्थं चकार सः ।

चतुःशालं महाशालं तदाकाशमयोऽभवत् ।। ३०

तदप्यस्य जहाराशु कालः कवलितप्रजः ।

जीर्णपर्णं यथा वातस्ततः शोकपरोऽभवत् ।। ३१

स चतुःशालशोकान्ते खरक्षार्थं चकार ह ।

कुसूलमम्बुदाकारं तदाकाशपरः स्थितः ।। ३२

तदप्यस्य जहाराशु कालो वात इवाम्बुदम् ।

कुसूलनाशशोकेन तेनासौ पर्यतप्यत ।। ३३

एवं गृहचतुःशालकुम्भकुण्डकुसूलकैः ।

तस्यापर्यवसानात्मा कालोऽयमतिवर्तते ।। ३४

एवं स्थितः स विवशो गगनं गुहायां

गृह्णन्गृहेण गहनेन किलात्मबुद्ध्या ।

दुःखान्तराद्घनतराद्घनदुःखजात-

मायाति याति च गतागतिसङ्गमूढः ।। ३५

इत्यार्षे श्रीवासिष्ठमहा० वा० दे०मो०निर्वाणप्रकरणे पू०चू०मिथ्यापुरुषोपाख्याने आकाशरक्षणं नाम

द्वादशोत्तरशततमः सर्गः ।। ११२ ।।